# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, अक्टूबर – २०१९

कक्षा – शास्त्रितृतीयवर्षम् (SEM-५) **प्रश्नपत्रम् – ५** गुणाः - ७०

विषयः – वेद **कोड – CC-3.5.9** समयः – ३.०० तः ६.००

दिनाङ्कः – १४/१०/२०१९ सन्दर्भग्रन्थः – शतपथब्राह्मणम्

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः – १ अधोलिखितेषु प्रश्नेषु कयोश्चिद् द्वयोः व्याख्यां लिखत।** १०

(१) स वा आरण्यमेवाश्नीयात् । स यदेवाशितमनशितं तदश्नीयाद् इति ।।

(२) योषा वा आपः वृषाग्निः । गृहा वै गार्हपत्यः ।

(३) अथ प्रतपति- प्रत्युष्टं रक्ष: प्रत्युष्टा अरातयो निष्टप्तं रक्षो निष्टप्ता अरातय: ॥

**प्रश्नः – २ निम्नलिखितयोः कस्यचिद् एकस्य निबन्धात्मकम् उत्तरं लिखत।** १०

(१)व्रतग्रहणविधानस्यावश्यकतां दर्शयित्वा तस्य प्रयोगविधिं यथाशास्त्रं लिखत।

(२)हविप्रोक्षणविधिं यथाशास्त्रं विवेच्यताम्।

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः – ३ अधोलिखितेषु प्रश्नेषु कयोश्चिद् द्वयोः व्याख्यां लिखत।** १०

(१) अथ कृष्णाजिनमादत्ते यज्ञस्यैव सर्वत्वाय । यज्ञो ह देवेभ्योऽपचक्राम ।।

(२) अग्नेस्तनूरसि वाचो विसर्जनम् ।

(३) तदभिमृशति- इदमग्नेरिदमग्निषोमयोः

**प्रश्नः – ४** **निम्नलिखितयोः कस्यचिद् एकस्य निबन्धात्मकम् उत्तरं लिखत।** **१०**

(१)यज्ञायुधध्वने: कारणं तदर्थं शतपथब्राह्मणस्याख्यायिकाविधानं च लिखत।

(२)कृष्णाजिनस्य वेदरूपत्वं निरूपयत।

## तृतीयान्वितिः (Unit-3)

**प्रश्नः – ५** **अधोलिखितेषु प्रश्नेषु कयोश्चिद् द्वयोः व्याख्यां लिखत।** **१०**

(१)त्रितायत्वा द्विताय त्वैकताय त्वा।

(२)देवाश्च वा, असुराश्च, उभये प्राजापत्याः पस्पृधिरे।

(३)योषा वै वेदिः, वृषाग्निः।

**प्रश्नः – ६** **निम्नलिखितयोः कस्यचिद् एकस्य निबन्धात्मकम् उत्तरं लिखत।** **१०**

(१) वेदिपरिग्रहविधिमाख्यायिकाविधानं च वर्णयत।

(२)हविपेषणविधिं समन्त्रकं लिखत।

**प्रश्नः – ७** **अधोलिखितेषु केषाञ्चन दश प्रश्नानाम् अतिलघूत्तराणि लिखत।** **१०**

(१)शुक्लयजुर्वेदस्य काण्वशाखायाः ब्राह्मणग्रन्थस्य नाम किमस्ति ?

(२)के यज्ञं तन्वानाः ?

(३)सवयसस्य पुत्रः कः ?

(४)"धू:" इति शब्दस्य कोऽर्थ: ?

(५)प्रणिताप्रणयनानन्तरं किं भवति ?

(६)अपां प्रणयनम् अग्ने: कस्यां दिशि भवति ?

(७)अग्निदेवस्य कृते हविग्रहणं कति वारं करोति ?

(८)"धूरसि धूर्व धूर्वन्" इति मन्त्रेण किं करोति ?

(९)अग्निदेवस्य कृते कति कपालानि ?

(१०) इट्शब्देन किं व्याचष्टे ?

(११) कृष्णयजुर्वेदस्य ब्राह्मणग्रन्थस्य नाम किमस्ति ?

(१२) हविष्कृत् आह्वाने वैश्यस्य कृते क: विशेष: ?

(१३) कृष्णमृगस्य यानि शुक्लानि तानि कस्य वेदस्य प्रतिनिधित्वं कुर्वन्ति ?

(१४) प्रजापतेः पुत्राः के सन्ति ?

(१५) दर्शपूर्णमासयागे कति ऋत्विज: ?

***

`**Answer Key**

| | | |
|---|---|---|
| कक्षा – शास्त्रितृतीयवर्षम् (SEM-५) | **प्रश्नपत्रम् – ५** | गुणाः - ७० |
| विषयः – वेद | **कोड – CC-3.5.9** | समयः – |
| दिनाङ्कः – | सन्दर्भग्रन्थः – शतपथब्राह्मणम् | |

**प्रश्नः –** ७

(१) शुक्लयजुर्वेदस्य काण्वशाखायाः ब्राह्मणग्रन्थस्य नाम किमस्ति ? शतपथब्राह्मणम्

(२)के यज्ञं तन्वानाः ? देवाः

(३)सवयसस्य पुत्रः कः ? सावयसः

(४) “धूः” इति शब्दस्य कोऽर्थः ? अग्निः

(५)प्रणिताप्रणयनानन्तरं किं भवति ? परिस्तरणम्

(६)अपां प्रणयनम् अग्रे: कस्यां दिशि भवति ? उत्तरस्यां दिशि

(७)अग्निदेवस्य कृते हविग्रहणं कति वारं करोति ? चतुर्वारम्

(८)“धूरसि धूर्व धूर्वन्” इति मन्त्रेण किं करोति ? धूरमभिमृशति

(९)अग्निदेवस्य कृते कति कपालानि ? अष्ट

(१०)इट्शब्देन किं व्याचष्टे ? वृष्टिः

(११) कृष्णयजुर्वेदस्य ब्राह्मणग्रन्थस्य नाम किमस्ति ? तैत्तिरीयब्राह्मणम्

(१२) हविष्कृत् आह्वाने वैश्यस्य कृते क: विशेष: ? हविष्कृदागहीति

(१३) कृष्णमृगस्य यानि शुक्लानि तानि कस्य वेदस्य प्रतिनिधित्वं करोति ? सामवेदस्य

(१४) प्रजापतेः पुत्राः के सन्ति ? देवाः असुराश्च

(१५) दर्शपूर्णमासयागे कति ऋत्विज: ? चत्वारः